Thus मुचतु—मुञ्चति, (लुम्पति, विन्दति, लिम्पति, विन्ढति, छुम्पति, खिन्दति, पिंषति ॥)

Note:—Why "before च"? Observe भोक्ता, भोक्तुम्, भोक्तव्यम् ॥ Why "of मच् &c."? Observe तुदति, तुदति ॥

Pre. मुञ्चति । Per. मुमोच । मुमुचतुः । मुमोचिथ । मुमुचिव । I Fut भोक्ता । II Fut. भोक्ष्यति । Impera मुञ्चतु । Imper. अमुञ्चत् । Poten. मुञ्चेत् । Bene. मुच्यात् । Aor. अमुचत् or अमोचयत् । Causa. मोचयति । Aor. अमूमुचत् । Desid. मुमुक्षति । Inten. मोमुच्यते । yaṅ luk मोमोक्ति । Nouns:—मोचः । मुक्ता । मोक्तिमत् । निर्मोकः । मतुचिः । मलमुचानि । मलमुक् । मलमुची । मलमुक्तः ।

Atm. Pre. मुञ्चते । Per. मुमुचे । I Fut. भोक्ता । II Fut. भोक्ष्यते । Impera. मुञ्चताम् । Imper. अमुञ्चत । Poten मुञ्चेत । Bene मुक्षीष्ट । Aor. अमुक्त । अमुचाताम् । Causa. मोचयते । अमूमुचत । Desid. मुमुक्षते ।

लुप्ल १३७ छेदने ।

लुप्यति-लुप्यते । अलुपत्-अलुप्त ।

137. √lupḷri, to cut off; to break.

It is conjugated like the last.

Pre. लुप्यति । Causa. लोपयति । Aor. अलुलुपत् or अलुलोपत् । Inten. लोलुप्यते । yaṅ luk लोलोप्ति ।

Atm. Pre. लुप्यते । Aor. अलुप्त ।

विदॢ १३८ लाभे ।

विन्दति-विन्दते । विवेद-विविदे । ज्याग्रभुत्यादिगणे वेदयोऽपत् । वेदिता । भाष्यादिगणेऽनिट्कः । वेत्ता । परिवेत्ता । परिवेदने । ज्येष्ठे परिदत्तश्च दारानग्नींश्च लभतेऽनिट्यर्थः । तुदादौ ।

138. √vidḷri, to get, obtain, acquire.

Pre. विन्दति । विन्दतः । Per. विवेद । विविदतुः । विविदिव । I Fut. वेदिता । According to Vyâgrabhuti, it is seṭ, but according to the Bhâshya, it is aniṭ as वेत्ता । Impera विन्दतु । Imper. अविन्दत् । Poten. विन्देत् । Bene. विद्यात् । Aor. अविदत् । अविदताम् । Causa. वेदयति Aor. अवीविदत् । Desid. विविदिषति or विवेदिषति । Inten. वेदिद्यते । yaṅ luk वेदीति । Past Pass वित्तः । Ger. विदित्वा or वेदित्वा । Nouns:—विन्दः । गोविन्दः । क्षुद्रः । ब्राह्मणवेदं । विन्दुः । वित्तम् । वेदिता । परिवेत्ता is formed by adding the affix तृच् or तृच् to the root This word means a younger brother married before the elder.

Atm. Pre. विन्दते । Per. विविदे । I Fut. वेदिता । II Fut. वेदिष्यते । Impera विन्दताम् । Imper. अविन्दत । Poten. विन्देत । Bene. वेदिषीष्ट । Aor. अवेदिष्ट ।

लिप १३९ उपदेहे ।

उपदेहो वृद्धिः । लिम्पति-लिम्पते । लेप्ता । 'लिपिसिचि-' (२३१८) इत्यङ् । वृद्धि तु वा । अलिपत्-अलिपत-अलिप्त ।

139. √lipa, to besmear, to anoint, to cover: upadeha means to 'increase'. Its aorist is formed by अङ् (III. 1. 53 S. 2418) The अङ् aoris is optional in the Atmanepadi.

Pre. लिम्पति । Per. लिलेप । लिलेपिव । लिलिपिव । I Fut लेप्ता । II Fut. लेप्स्यति । Impera. लिम्पतु । Imper. अलिम्पत् । Poten. लिम्पेत् । Bene. लिप्यात् । Aor. अलिपत् । Causa. लेपयति Aor. अलीलिपत् । Desid. लिलिप्सति । Inten. लेलिप्यते yaṅ luk लेलेप्ति । Nouns:—लिम्पः । निर्लिम्पा । लिपिः । लिविः ।

Atm. Pre. लिम्पते । Per. लिलिपे । I Fut. लेप्ता । II Fut. लेप्स्यते । Impera. लिम्पताम् । Imper. अलिम्पत । Poten. लिम्पेत । Bene. लिप्सीष्ट । Aor. अलिप्त or अलिपत । Desid. लिलिप्सते ।

षिच १४० क्षरणे ।

सिञ्चति-सिञ्चते । असिचत्-असिचत-असिक्त । अभिषिञ्चति । अभ्यषिञ्चत् । अभिषिषेच ।

140. √shicha to sprinkle, moisten.

Pre. सिञ्चते । Per. सिषिचे । असिक्त Aor. असिचत् असिक्षाताम् । सिसिक्षते ।

Pre. सिञ्चति । With the prefix अभि, स is changed to ष. Thus अभिषिञ्चति । अभ्यषिञ्चत् । अभिषिषेच । Per. सिषेच । सिषिचतुः । सिसेचिव । I Fut. सेक्ता । II Fut. सेक्ष्यति । Impera. सिञ्चतु । Imper. असिञ्चत् । Poten. सिञ्चेत् । Bene. सिच्यात् । Aor.

अचिचत्। Causa. चेचयति। Aor अचीचिचत् Desid. चिचिक्षति। Inten. चेक्षिच्यते। yaṅ luk चेक्षेक्ति। Nouns:—चंकृत्य। चिकृचत्।

अथ अदः परस्मैपदिनः।

कृती १४१ छेदने।

कृन्तति। चकर्त। कर्तिता। कर्तिष्यति-कर्त्स्यति। अकर्तीत्।

141. √kṛitâ to cut.

The following three roots are Parasmaipadis.

Pre. कृन्तति। Per. चकर्त। चकृततुः। चकर्तिथ। चकृत। चकृतिव। I Fut. कर्तिता। II Fut. कर्तिष्यति or कर्त्स्यति। Impera. कृन्ततु। Imper. अकृन्तत्। Poten. कृन्तेत्। Bene. कृत्यात्। Aor. अकर्तीत्। अकर्तिष्टाम्। Causa. कर्तयति। Aor. अचकर्तत्। Desid. चिकृत्सति or चिकर्तिषति। Inten. चरीकृत्यते। yaṅ luk चरिकर्ति। Past Pass. कृतः। Act. कृतवान्। Nouns:—चिकर्तनः। कृतिः। कृत्यम्।

खिद १४२ परिघाते।

खिन्दति। चिखेद। खेत्ता। अयं दैन्ये दिवादौ चधादौ च।

142. √khida, to strike, press down, afflict.

This root when meaning 'to be poor,' belongs to the Divâdi and Rudhâdi classes also.

Pre. खिन्दति। Per. चिखेद। चिखिदतुः। चिखेदिथ। I Fut. खेत्ता। II Fut. खेत्स्यति। Impera. खिन्दतु। Imper. आखिन्दत्। Poten. खिन्देत्। Bene. खिद्यात्। Aor. अखेत्सीत्। अखेत्ताम्। Causa. खेदयति। Aor. अचीखिदत्। Desid. चिखित्सति। Inten. चेखिद्यते। yaṅ luk चेखेक्ति or चेखिदीति। Past Pass. खिन्नः। Ger. खित्वा। Noun:—खिदिरम्।

पिश १४३ अवयवे।

पिंशति। पेशिता। अयं दीपनायापि। 'त्वङ्' रूपाणि पिंशतु'। वृत्। चुरादयस्तुदादयश्च।

143. √pisá, to shape, fashion form.

This root when meaning 'to go', belongs to the Churadi class.

It means also 'to kindle, to show,' as in the sentence त्वङ्गरूपाणि पिंशतु।

Pre. पिंशति। Per. पिपेश। पिपेशिथ। पिपिशिव। I Fut. पेशिता। II Fut. पेक्ष्यति। Impera. पिंशतु। Imper. अपिंशत्। Poten. पिंशेत्। Bene. पिश्यात्। Aor. अपेशीत्। अपेशिष्टाम्। Causa. पेशयति Aor. अपीपिशत्। Desid. पिपिंशिषति। Inten. पेपिश्यते yaṅ luk पेपिशीति or पेपेष्टि। Past Pass. पिंशितम्। Ger. पेशित्वा or पिंशित्वा। Nouns:—पिशाचः। पशितारः। पिशङ्गः पिशंगा। पेशी।

वृत् (end). Here end both the Muchâdi and the *Tudâdi*.

इति तिङन्ततुदादिप्रकरणम्।

अथ तिङन्त रुधादि प्रकरणम् ॥

CHAPTER VII.

THE RUDHADI ROOTS.

These are some twenty-five roots in all. Their chief peculiarity is that in the conjugational tenses they insert a nasal after the final vowel. The first root is,

रुधिर् १ आवरणे ।

नव स्वरितेत इरित ।

1. √rudhir, to cover. This root and the eight that follow it are all svaritet and have each an indicatory इर् (III. 1. 57. S. 2269). This root takes two accusatives: as व्रजं गां रुणद्धि । In conjugating verbs of this lass, the vikaraṇa श्नम् is added by the following :—

२५४३ । रुधादिभ्यः श्नम् । ३ । १ । ७८ ।

सर्वोऽपवादः । निरुधादन्त्यादचः परः । नित्यत्वाद्गुणं बाधते । रुणद्धि : 'श्नसोरल्लोपः' । (२३६९) । ङित्त्वस्यासिद्धत्वादनुस्वारः । परसवर्णः । तस्यासिद्धत्वात्पदत्वं न । 'न पदान्त-' (५१) इति सूत्रेणानुस्वारपरसवर्णयोरल्लोपो न स्थानिवत् । रुन्धः । रुन्धन्ति । रुन्धे । रोद्धा । रोत्स्यति-रोत्स्यते । रुणद्धु । रुन्ध्यात् । रुन्धि । रुणधानि । रुणधै । अरुणत् । अरुन्धाम् । अरुधन् । अरुणः । अरुणधम् । अरुणधम्-अरौत्सीत्-अरुत् ।

2543. The affix श्नम् comes after the roots of the Rudhâdi class, in denoting an agent when a sârvadhâtuka affix follows.

This debars शप्. The indicatory श् of the affix श्नम् shows that the affix न is to be placed after the last vowel of the root; for sûtra I. 1. 47. S. 37. applies, though it is an affix, and not an augment. As रुध्+श्नम्+ति=रुध्+न+ति=र+न+ध्+ति=रुणद्धि 'he obstructs'. So also निनत्ति 'he splits'. The indicatory ङ is for the sake of sûtra, VI. 4. 23. S. 2544 and VI. 4. 111. S. 2469, and not to give this vikaraṇa the name of sârvadhâtuka; since no purpose is served by calling it a sârvadhâtuka. Obj. By being a sârvadhâtuka, it will prevent guṇa in non—पित् affixes, by making them ङित् (I. 2. 4. S. 2234)? No. The guṇa ordained by VII. 3. 84. S. 2168 is with regard to the इक् vowels of an aṇga or stem. But in र+श्नम्+ध्+ति, the न that ends in the इक् vowel उ is not the *stem* or anga, but merely a portion of the stem: and so पित् affixes cannot cause the guṇa of this उ। Nor does the vikaraṇa itself cause guṇa; because it being a nitya or compulsory affix is added, before the coming into operation of the Guṇa rule.

Thus रु+ध+ध्+सिच्=रु+ध+ध्+धि (VIII. 2. 40. S. 2280)=रु+ध+द्+धि (VIII. 4. 53. S. 52)=रुद्धि।

The dual is thus formed: रु+ध+ध्+तस्=रु+न्+०+ध्+तस् (VI. 4. 111. S. 2469. The न of ध is elided before the ङित् sârvadhâtuka affix तस्) =रु+ध्+०+ध्+तस्। The ध् is considered asidhha for the purposes of anusvâra change, as it was evolved by the operation of a Tripâdi rule VIII. 4. 1. S. 235, which is looked upon as non-effective for the purposes of the prior rule VIII. 3. 24 S. 123. Therefore ध् being still looked upon as ध् we change it to anusvâra. रु+०+ध्+तस्। The anusvâra is then changed to a letter homogeneous with the subsequent by VIII. 4. 58. S. 124. As, रु+न्+०+ध्+तस्। This न् obtained by a Tripâdî rule is asiddha for the purposes of the prior VIII. 4. 1. S. 235, and so it is not again changed to ध्।

Question.—In the equation रु+न्+०+ध्+तस्, how can न् be changed to anusvâra before ध्, since the lopâdesa zero *intervenes* between it and ध् and it is sthânivat? Moreover in रु+०+ध्+तस् how can the anusvâra be changed to न्, since it is not followed by ध्, but by a lopâdesa zero?

Answer.—The zero is not sthânivat because I. 1. 58. S. 51 makes a special exception in favor of savarṇa—viddhi and anusvâra—vidhi.

For further explaination of this rule see my Ashṭâdhyâyî page 50 paras. 6 and 7).

Thus in the third person dual we get रु+न्+ध्+तस्=रु+न्+ध्+धस् (VIII. 2. 40. S. 2280)=रुन्धः or रुन्द्धः॥

1. √rudhir to cover.

Pre. रुणद्धि। रुन्द्धः। रुन्धन्ति। रुणत्सि। रुन्ध्थः। रुन्ध्थ। रुणद्धि। रुन्द्ध्वः। रुन्द्ध्मः। Per. रुरोध। रुरुधतुः। रुरुधुः। रुरोत्सिथ। रुरुधिव। रुरुधिम। I Fut. रोद्धा। II. Fut. रोत्स्यति। Impera. रुणद्धु or रुन्धात्। रुन्धाम्। रुन्धन्तु। रुणद्धि। रुन्धम्। रुन्ध। रुणधानि। रुणधाव। रुणधाम। Imper. अरुणत् or ० द्। अरुन्धाम्। अरुणन्धम्। अरुणत् or अरुणः। अरुन्धम्। अरुन्ध। अरुणधम्। अरुणद्ध्व। अरुन्द्ध्व। अरुन्द्ध्म। Poten. रुन्ध्यात्। रुन्ध्याताम्। रुन्ध्युः। रुन्ध्याः। रुन्ध्यातम्। रुन्ध्यात। रुन्ध्याम्। रुन्ध्याव। रुन्ध्याम। Bene. रुध्यात्। रुध्यास्ताम्। Aor. अरौत्सीत् or अरौधीत्। अरुधताम् or अरौद्धाम्। अरुधन् or अरौत्सुः। अरुधः or अरौत्सीः। अरुधतं or अरौद्धं। अरुधत or अरौद्ध। अरुधम् or अरौत्सम्। अरुधाव or अरौत्स्व। अरुधाम or अरौत्स्म। Pass. रुध्यते। Aor. अरोधि। Causa. रोधयति। Aor. अरूरुधत्। Desid. रुरुत्सते। Inten. रोरुध्यते। yan luk रोरोद्धि Past. Parti, रुद्धः। Parti. Ger. रुद्ध्वा or रुद्ध्य। Nouns:—रोधः। रुधिरम्।

1. √rudh. Atmanepadi.

Pre. रुन्धे। रुन्धाते। रुन्धते। रुणत्से। रुन्धाथे। रुन्ध्वे। रुणद्धे। रुन्द्ध्वहे। रुन्द्ध्महे। Per. रुरुधे। रुरुधाते। रुरुधिरे। रुरुधिषे। रुरुधाथे। रुरुधिढ्वे। रुरुधे। रुरुधिवहे। रुरुधिमहे।

I Fut. रोद्धा । II Fut. रोत्स्यते । Impera. रुन्धात् । रुन्धाताम् रुन्धताम् । रुन्त्स्व । रुन्धाथाम् । रुन्ध्वम् । रुनधै । रुनधावै । रुनधामै । Imper. अरुन्धत । अरुन्धाताम् । अरुन्धत । अरुन्धाः । अरुन्धाथाम् । अरुन्ध्वम् । अरुन्धि । अरुन्ध्वहि । अरुन्ध्महि । Poten. रुन्धीत । रुन्धीयाताम् । रुन्धीरन् । रुन्धीथाः । रुन्धीयाथाम् । रुन्धीध्वम् । रुन्धीय । रुन्धीवहि । रुन्धीमहि । Bene. रुत्सीष्ट । रुत्सीयास्ताम् । Aor. अरुद् । अरुत्साताम् । अरुत्सत । अरुद्धाः । अरुत्साथाम् । अरुद्ध्वम् । अरुत्सि । अरुत्स्वहि । अरुत्स्महि ।

भिदिर् २ विदारणे ।

भिनत्ति–भिन्ते । भेत्ता । भेत्स्यति । अभिनत्–अभिनः । अभिनद्व् । अभिन्त । अभिदत्–अभैत्सीत्–अभित्त ।

2. √bhidir to break, cleave, split.

Pre. भिनत्ति । भिन्तः । भिन्दन्ति । भिनत्सि । भिन्थः । भिन्थ । भिनद्मि । भिन्द्वः । भिन्द्मः । Per. बिभेद । बिभिदतुः । बिभिदुः । बिभेदिथ । बिभिदिव । I Fut. भेत्ता । II Fut. भेत्स्यति । Impera. भिनत्तु or भिन्तात् । भिन्ताम् । भिन्दन्तु । भिन्धि । भिनदानि । Imper. अभिनत् । अभिन्ताम् । अभिन्दन् । अभिनः । अभिन्तम् । अभिन्त । अभिनद्व । अभिन्द्व । Poten. भिन्द्यात् । भिन्द्याताम् । भिन्द्युः । भिन्द्याः । Bene. भिद्यात् । भिद्यास्ताम् । Aor. अभिदत् । अभिदताम् । अभैत्सीत् । अभैत्ताम् । Causa. भेदयति । Aor. अबीभिदत् । Desid. बिभित्सति । Atm. बिभित्सते । Inten. बेभिद्यते । yaṅ luk बेभिदीति or बेभेत्ति । Nouns:—भिदुरं । भिदा । भित्तम् । भिदिरं । उद्भिदः ।

2. √bhidir. Atmanepadi.

Pre. भिन्ते । भिन्त्से । भिन्दे । Per. बिभिदे । बिभिदिषे । I Fut. भेत्ता । II Fut भेत्स्यते । Impera. भिन्ताम् । भिन्दाताम् । भिन्त्स्व । भिनदै । Imper. अभिन्त । अभिन्दाताम् । अभिन्दत । अभिन्थाः । अभिन्धि । Poten. भिन्दीत । Bene. भित्सीष्ट । Aor. अभित्त । अभित्साताम् ।

छिदिर् ३ द्वैधीकरणे ।

अच्छिदत्–अच्छैत्सीत्–अच्छित्त ।

3. √chhidir to cut, to take away, to remove.

Pre. छिनत्ति । Aor. अच्छिदत् or अच्छैत्सीत् or अच्छित्त । Nouns: छिदुरम् । पर्शुदा । परशुः । छेदः । छिदिरम् । छिद्रम् ।

रिचिर् ४ विरेचने ।

रिणक्ति–रिङ्क्ते । रिरेच–रिरिचे । रेक्ता । अरिचक् । अरिचत्–अरैक्षीत्–अरिक्त ।

4. √richir to purge, evacuate.

Pre. रिणक्ति । A. रिङ्क्ते । रिणक्षि । रिङ्क्थः । रिङ्क्थ । रिरिक्थ । रिरिक्थः । Per रिरेच; A. रिरिचे । रिरिचतुः । रिरेचिथ । रिरिचिव । I Fut. रेक्ता । II Fut. रेक्ष्यति । A. रेक्ष्यते । Impera. रिणक्तु or रिङ्क्तात् A. रिङ्क्ताम् । रिङ्क्ताम् । रिञ्चन्तु । रिङ्ग्धि । A. रिङ्क्ष्व । रिणचानि । A. रिणचै । Imper. अरिणक्–अक् । A. अरिङ्क्त । A. अरिङ्क्थाः । A. अरिरिक्षि । Poten. रिञ्च्यात् । A. रिङ्क्षीत । रिञ्च्यास्ताम् । Bene रिच्यात् । A. रिक्षीष्ट । Aor. अरिचत् or अरैक्षीत् । A. अरिक्त । A. अरिक्षाताम् । Causa रेचयति । Aor. अरीरिचत् । Desid. रिरिक्षति. A. रिरिक्षते । Inten. रेरिच्यते । yaṅ luk रेरिचीति or रेरेक्ति । Nouns:—रेकः । रिक्थम् । रिरिक्षुः । रिरिक्षिः । रिरिचिनः ।

विचिर् ५ पृथग्भावे ।

विनक्ति-विङ्क्ते ।

5. √vichir to separate, to discriminate.

It is conjugated like √richir.

Pre. विनक्ति । A. विङ्क्ते । विङ्क्तः । Nouns:—विवेकी ; विवेकः ।

क्षुदिर् ६ संपेषणे ।

क्षुणत्ति-क्षुन्ते । क्षोत्ता । अक्षदत्-अक्षौत्सीत्-अक्षुत्त ।

6. √kshudir to bruise ; pound down.

Pre. क्षुणत्ति । क्षुन्तः । क्षुन्दन्ति । क्षुणत्सि । क्षुन्थः । क्षुन्थः । Per. क्षुक्षोद । क्षुक्षोदिथ । क्षुक्षुदिवः । I Fut. क्षोत्ता । II Fut. क्षोत्स्यति । Impera. क्षुणत्तु or क्षुन्तात् । क्षुन्ताम् । क्षुन्दन्तु । क्षुन्धि । क्षुनानि । Imper. अक्षुणत् । अक्षुन्ताम् । अक्षुन्दन् । अक्षुणत्-द् or अक्षुणः । अक्षुन्दम् । अक्षुन्ध । Poten. क्षुन्दात् । क्षुन्दाताम् । Bene. क्षुत्तात् । क्षुत्तास्ताम् । Aor. अक्षुदत् or अक्षौत्सीत् । अक्षुदताम् or अक्षौत्ताम् । अक्षुदन् । Causa क्षोदयति । Aor. अक्षुक्षुदत् । Desid. क्षुक्षुत्सति । A क्षुक्षुत्सते । Inten. क्षोक्षुद्यते । yaṅluk क्षोक्षोत्ति । Pass. Past Parti. क्षोदित । Act. क्षोदितवान् । Nouns:— क्षुत् । क्षौत्तं । क्षोदिमा ।

6. √kshudir. Atmanepada.

Pre. क्षुन्ते । क्षुन्दाते । क्षुन्दते । क्षुन्त्से । क्षुन्दाथे । क्षुन्ध्वे । क्षुन्दे । क्षुन्दावहे । क्षुन्दामहे । I Fut. क्षोत्ता । II Fut. क्षोत्स्यते । Impera. क्षुन्ताम् । क्षुन्दाताम् । क्षुन्दताम् । क्षुन्त्स्व । क्षुन्दाथाम् । क्षुन्ध्वम् । क्षुन्दै । क्षुन्दावहै । क्षुन्दामहै । Imper. अक्षुन्त । अक्षुन्दाताम् । अक्षुन्दत । अक्षुन्थाः । Poten. क्षुन्दीत । क्षुन्दीयाताम् । Bene. क्षुत्सीष्ट । क्षुत्सीयास्ताम् । Aor. अक्षुत्त । अक्षुत्साताम् ।

यूजिर् ७ योगे ।

योक्ता ।

7. √yujir to join, unite.

Pre. युनक्ति । युङ्क्तः । युञ्जन्ति । युनक्षि । युङ्क्थः । Per. युयोज । युयोजिथ । युयुजिव । I Fut. योक्ता । II Fut. योक्ष्यति । Impera. युनक्तु or युङ्क्तात् । युङ्क्ताम् । युञ्जन्तु । युङ्ग्धि or युङ्क्तात् । युङ्क्तम् । युनजानि । युनजाव । युनजाम । Imper. अयुनक्-०ग् । अयुङ्क्ताम् । अयुङ्क्त । अयुङ्क्तम् । Poten. युञ्ज्यात् । युञ्ज्याताम् । Bene. युक्ष्यात् । Pass. युज्यते । Nouns:—युग्यं । युजः । अश्वयुक् । योक्त्रः । योगी । योग्यः । दौगिकः । युगल् । परियोगः ।

7. √yujir. Atmanepada.

Pre. युङ्क्ते । युञ्जाते । युञ्जते । युङ्क्षे । युञ्जाथे । युङ्ध्वे । युञ्जे । युञ्जावहे । युञ्जामहे । I Fut. योक्ता । II Fut. योक्ष्यते । Impera. युङ्क्ताम् । Imper. अयुङ्क्त । अयुञ्जि । अयुञ्ज्वहि । Poten. युञ्जीत । Bene. युक्षीष्ट ।

उच्छृदिर् ८ दीप्तिदेवनयोः ।

कृणत्ति-कृन्ते । चच्छर्द । 'ऋतश्चि-' (२५०६) इति वेट् । चच्छृदिषे-चच्छृदिढ्वे । छर्दिता । छर्दिष्यति-छर्त्स्यति । अच्छृदत्-अच्छर्दीत्-अच्छर्दिष्ट ।

8. √uchhṛidir. 1. to shine. 2. to play.

Pre. कृच्छति । कृन्तः । कृन्दन्ति । कृच्छसि । कृन्थः । Per. चच्छर्द । चच्छृदतुः । चच्छृदुः । चच्छृदिथ । I Fut छर्दिता । II Fut छर्दिष्यति । Impera कृच्छतु or कृन्तात् । कृन्दाम् । कृन्दन्तु । Imper. अच्छृणत् । अच्छृन्ताम् । Poten. कृन्दात् । Bene. कृत्सात् । Aor. अछृदत् । Causa. छर्दयति । Aor. अचच्छर्दत् or अचच्छृदत् or अचिच्छृदत् । Desid. चिच्छर्दिषति or चिच्छृत्सति । Inten. चरीच्छृद्यते । yaṅ luk चर्छर्ति । Pass. Past Parti. कृन्नः । Act. Past Parti कृच्छवान् । Ger. कृत्वा or छर्दित्वा ।

8. √uchhridir. Atmanepada.

Pre कृच्छे । कृन्त्से । कृन्दे । कृन्द्वहे । Per. चच्छृदे । चच्छृदिषे । or चच्छृत्से । (The इट् augment is optional by VII. 2. 57 S. 2506). I Fut. छर्दिता । II Fut. छर्दिष्यते or छर्त्स्यते । Imper. अच्छृन्त । अच्छृन्दाताम् । Poten. कृन्दीत । Bene. छर्दिषीष्ट or कृत्सीष्ट । Aor अच्छृत or अच्छर्दिष्ट । अच्छृत्साताम् or अच्छर्दिषाताम् ।

उतृदिर् ९ हिंसानादरयोः ।

तुदादित्यादि ।

9. √utṛidir. 1. to kill, to destroy, 2. to disregard.

It is conjugated like the last.

Pre. तृणत्ति ।

तीङ् १० वेष्टने ।

परस्मैपदी । कृणत्ति । आर्धधातुके तीङादिकवत् ।

10. √kṛitî to surround, encompass.

It is Parasmaipadi; before ârdhadhâtuka affixes it is conjugated like the √kṛit of the Tudâdi class.

Pre. कृणत्ति । कृन्तः । कृन्तन्ति । कृणत्सि । कृन्थः । Per. चकर्त्त । चकृततुः । चकृतिथ । कृत । चकर्त्त । चकृतिव । चकृतिम । I Fut. कर्तिता । II Fut. कर्त्स्यति or कर्तिष्यति । Impera. कृणतु । Imper. अकृणत् । Poten. कृन्त्यात् । Bene. कृत्यात् । Aor. अकर्तीत् । अकर्तिष्टाम् । Causa. कर्तयति । Aor. अचकर्तत् । Desid. चिकृत्सति or चिकर्तिषति । Inten. चरीकृत्यते । yaṅ luk चरिकृतीति ।

ञिइन्धी १११ दीप्तौ ।

अय आत्मनेपदिनः ।

11. √iṅi indhi to kindle, to blaze.

This and the two following roots are âtmanepadi.

Thus इ + श्नम् + न्ध् + ते । Now applies the following sûtra by which the न् of न्ध् is elided.

२५६ । आज्झलोपः । ६ । ४ । २३ ।

श्नमः परस्य नस्य लोपः स्यात् । 'श्नसोरल्लोपः' (२४६९) । इन्धे । इन्धाते । इन्धिता । इन्धाते । ऐन्ध । ऐन्धाः ।

2544. After श, which is added to the roots of the seventh class as a characteristic (*i. e.* the vikaraṇa श्नम्), there is the elision of the following श ॥

Therefore, इ+श+ध्+ते=इ+श+ध्+ते=इन्धे।

11. √ñi indhî to kindle, to blaze.

This and the two following roots are Atmanepadi.

Pre. इन्धे or इंद्धे। इन्धाते। इन्त्से। इन्ध्वे। Per. इंधांचक्रे or इंधे or (I. 2. 6 S. 3393) I Fut. इंधिता। II Fut. इंधिष्यते। Impera. इंधां or इंद्धां। इन्धाताम्। इन्धताम्। इंत्स्व। इनधै। Imper. ऐंध or ऐंद्ध। ऐन्धाताम्। ऐन्धत। ऐन्धाः। ऐन्धि। Poten. इंधीत। इन्धीयाताम्। Bene. इंधिषीष्ट। इंधिषीयास्ताम्। Aor. ऐधिष्ट। ऐन्धिषाताम्। Pass. इध्यते। Causa. इंधयति। Aor. ऐन्धिपत्। Desid. इंधिधिषते। Pass. इद्धः। Nouns:—अग्निमिन्धः। समित्। आग्निध्रः। विध्मः। इध्मः।

खिद् १२ दैन्ये।

खिन्ते। खेत्ता।

12. √khida to suffer pain or misery.

Pre. खिन्ते। खिन्दाते। खिन्त्से। खिन्दे। Per खिखिदे। I Fut. खेत्ता। II Fut. खेत्स्यते। Impera. खिन्ताम्। खिन्दाताम्। खिन्त्स्व। खिनदै। Imper. अखिन्त। अखिन्दाताम्। अखिन्द्धि। Poten. खिन्दीत। Bene. खित्सीष्ट। Aor. अखित्त। Causa. खेदयति। Aor. अचीखिदत्। Desid. चिखित्सते। Inten. खेखिद्यते। Pass खिन्नः। Ger. खित्त्वा। Nouns:—खिदिरम्।

विद् १३ विचारणे।

विन्ते। वेत्ता।

13. √vida to consider, regard.

Pre. विन्ते। I Fut. वेत्ता।

अथ परस्मैपदिनः।

The following roots are Parasmaipadi.

शिष्लृ १४ विशेषणे।

शिनष्टि। शिंष्टः। शिंषन्ति। शिशेषिथ। शेष्टा। शेषयति। शेशिः। अशस्वत्। 'ऋरो झरि-(७१) इति या, ङलोपः। अनुस्वारपरसवर्णौ। शिविड-शिविड्ड। शिनत्ति। अशिनट्। लृदित्त्वा दङ्। अशिषत्।

14. √shiḷri to distinguish or discriminate from others.

Pre. शिनष्टि। शिंष्टः। शिंषन्ति। शिनत्सि। शिनद्मि। शिंष्वः। Per. शिशेष। शिशिषतुः। शिशेषिथ। शिशिषिव। I Fut. शेष्टा। II Fut. शेषयति। Impera. शिनष्टु or शिंष्टात्। शिंष्टाम्। शिषिड or शिषड्ढि। The षि is changed to षि। The ष् changed to जश् letter ड by VIII. 4. 53 S 52. The ड is optionally elided by S. 71. The श changed to anusvâra, and which is changed to श again. See note under S. 2543. शिनत्ति। Imper अशिनट्-ठ्। अशिंष्टाम्। अशिनषत्। अशिंष्व। Poten. शिंष्यात्। शिष्यास्ताम्। Bene. शिष्यात्। Aor. अशिषत्। The aorist is

formed by भक् because of the indicatory क्। See III 1. 55. S. 2343. Causa. शेषयति। Aor. अशीशिषत्। Desid. शिशिक्षति। A. शिशिक्षते। Inten. शेशिक्ष्यते। yaṅ luk शेशिषीति or शेशेक्ष्टि। Pass. शिक्षः। Act. शिक्षवान्। Nouns:— शिशेषः। शैशेषिकं।

पिष्लृ १५ संचूर्णने।

पिपिष्वत्। पिनष्टि।

15. √pishlri to pound, to grind.

It is conjugated like √शिष्॥

Pre. पिनष्टि Noun:—पिष्टम्।

भञ्जो १६ आमर्दने।

भनक्ति। बभञ्जिथ। बभङ्क्थ। भङ्क्ता।

16. √bhanjo, to break, tear down, shatter.

Pre. भनक्ति। भङ्क्तः। भञ्जन्ति। भनक्षि। भनज्मि। भञ्ज्वः। Per. बभंज। बभञ्जतुः। बभञ्जिथ or बभङ्क्थ। बभञ्जिव। I Fut. भंक्ता। II Futं. भंक्ष्यति। Impera. भनक्तु or भनक्तात्। भङ्ग्धि। भनजानि। Imper. अभनक्। or अन्। अभङ्क्ताम्। अभञ्जन्। अभनक्। अभनञ्जम्। Poten. भंज्यात्। Bene. भज्यात्। Aor. अभांक्षीत्। अभङ्क्ताम्। Pass. भज्यते। Aor. अभंजि or अभाजि। Causa भंजयति। Aor. अवभञ्जत्। Desid. बिभंक्षति। Inten. बंभज्यते। yaṅ luk बंभंक्ति or बंभंजीति। Pass. भग्नः। Act. भग्नवान्। Ger. भङ्क्त्वा or भक्त्वा। Nouns:—भङ्गुरः। भङ्गः। भङ्गी।

भुज १७ पालनाभ्यवहारयोः।

भुनक्ति। भोक्ता। भोक्ष्यति। अभुनक्।

17. √bhuja, 1. to protect, 2. to eat.

Pre. भुनक्ति। भुङ्क्तः। भुञ्जन्ति। भुनक्षि। Poten. भुञ्ज्यात्। Bene. भुज्यात्। Aor. अभौक्षीत्। अभोक्ताम्। Causa. भोजयति। Aor. अबूभुजत्। Desid. बुभुक्षति। Inten. बोभुज्यते। yaṅ luk. बोभुजीति or बोभोक्ति। Pass. भुक्तम्। Nouns:— भोगः। भुजः। भोजः।

17. √bhuja, 1. to protect, 2. to eat. Atmanepada.

Pre. भुङ्क्ते। भुञ्जाते। भुञ्जते। भुक्षे। भुञ्जाथे। भुङ्ध्वे। भुञ्जे। भुञ्जावहे। भुञ्जामहे। Per. बुभुजे। बुभुजिषे। I Fut. भोक्ता। भोक्तासे। II Fut. भोक्ष्यते। Impera. भुङ्क्ताम्। Imper. अभुङ्क्त। अभुंजाताम्। Poten. भुञ्जीत। भुञ्जीयाताम्। Bene. भुक्षीष्ट। Aor. अभुक्त। Desid. बुभुक्षते।

तृह १८ हिंसि १९ हिंसायाम्।

18. √tṛiha, to injure. Thus तृ+शनह्+ह्+ति=तृनह्+ति। Now by the following sûtra, तृनह् becomes तृणेढ् before चित् affixes which begin with a consonant.

२५४५ । तृहश्च इम् । ७ । ३ । ९२ ।

तृहः श्नसि कृत इमागमः स्याद्वलादौ क्ङिति । तृणेढि । तृण्ढः । ततर्ह । तर्हिता । अतृणेट् । हिनस्ति । जिहिंस । हिंसिता ।

2545. Before a क्ङित् Sârvadhâtuka affix beginning with a consonant, इ is added after ह of the verbal stem तृह् ॥

Note:—As तृणेढि, तृणेढि, तृणेक्षि, अतृणेट् ॥ In the last example though the affix vanishes altogether, yet it produces its effect. Why beginning with a consonant? Observe तृह्स्वानि ॥ Why a क्ङित् affix? Observe तृण्ढः with तस् ॥ The stem तृह्श्न is formed from the root तृह (Rudhâdi) with the vikaraṇa श्नस्, and is so exhibited in the sûtra in order to indicate that the augment इम् is added *after* the vikaraṇa श्नस् has been added, and that the root तृह of Tudâdi class is not to be taken

Thus तृह+श्न+इ+ति= तृणेह्+ति (VI. I. 87. S. 69) =तृणेह्+ति (VIII. 2. 31. S. 324) =तृणेह्+धि (VIII. 2. 40 S. 2280) =तृणेह्+ढि (VIII. 4. 41 S. 113) =तृणे+ढि (VIII. 3. 31. S. 2335) =तृणेढि ।

18. √triha, √trihi, 19. √hisi to injure.

Pre, तृणेढि । तृण्ढः । तृंहन्ति । तृणेक्षि । (VIII. 2. 41. S. 295). तृण्ढः । तृण्ढ । तृणेह्मि । तृंह्वः । तृंह्मः । Per. ततर्ह । ततृहतुः । ततृहुः । ततर्हिथ । ततृहिव । I Fut. तर्हिता । II Fut. तर्हिष्यति । Impera. तृणेढु or तृण्ढात् । तृण्ढाम् । तृंहन्तु । तृण्ढि । तृह्स्वानि । Imper. अतृणेट्-०ह् । अतृण्ढाम् । अतृहन् । अतृणेट्-०ह् । अतृह्स्व । अतृंह । Bene. तृह्यात् । तृह्यास्ताम् । Aor. अतर्हीत् । अतर्हिष्टाम् । Pass. तृह्यते । Aor. अतर्हि । Causa. तर्हयति । Aor. अततर्हत् or अतीतृहत् । Desid. तितर्हिषति or तितृहति । Inten. तरीतृह्यते । yaṅ luk. तरीतर्हि । Ger. तर्हित्वा ।

19. √hisi to injure.

Pre. हिनस्ति । हिंस्तः । हिंसन्ति । हिनस्षि । हिनस्मि । Per. जिहिंस । जिहिंसतुः । जिहिंसिथ । जिहिंसिव । I Fut. हिंसिता । II Fut. हिंसिष्यति । Impera. हिनस्तु or हिंस्तात् । हिंस्ताम् । हिंसन्तु । हिन्धि । हिनस्तानि । Imper. अहिनत् । अहिंस्ताम् । अहिंसन् । अहिनत्-०द । अहिनः (VIII. 2. 74. S 2485). अहिनस्म् । अहिंस्व । Poten. हिंस्यात् । हिंस्याताम् । Bene. हिंस्यात् । हिंस्यास्ताम् । Aor. अहिंसीत् or अहिंसिष्ट । Causa. हिंसयति । Aorist. अजिहिंसत् । Desid. जिहिंसिषति । Inten. जेहिंस्यते । yaṅ luk जेहिंस्ति । Pass. हिंसितः । Ger. हिंसित्वा । Nouns:—हिंसकः । हिंस्रः । हिंसा । सिंहः ।

उन्दी २० क्लेदने ।

उनत्ति । उन्तः । उन्दति । उन्दांचकार । औनत् । औन्ताम् । औन्दन् । औनः । औनम् । औनद्व ।

20. √undî to wet, moisten, bathe.

Pre. उनत्ति । उन्तः । उन्दन्ति । Per. उन्दाञ्चकार । Imp. 1st S. उनदानि । Imper. नत् । औन्तात् । औन्दत् । औनः; औनत्-०द् । औनदत् । Poten. उन्द्यात् । उन्द्यातात् । Bene. उद्यात् । उद्यास्तात् । Aor. औन्दीत् । औन्दिष्टात् । Causa. उन्दयति । Desid. उन्दिदिषति । Pass. उन्द्यत्; उन्त्त; Ger. उन्दित्वा । Nouns:—औनोदः । औन्दुः । : । औनदत् । उन्द्रत् । उदकः । उदधिः । उदवाहः । उदजन्यः ।

अञ्जू २१ व्यक्तिम्रक्षणकान्तिगतिषु ।

क्ति । अक्तः । अञ्जन्ति । आनञ्ज । आनञ्जिथ-आनक्थ । अक्ता । अञ्जिता । क्ष्णि । अनजानि । आनक् ।

21. √añjû, 1. to anoint. 2. to shine, 3. to go.

Thus अञ्ज्+तिप्=अ+नम्+ञ्ज्+ति=अन+ञ्ज्+ति=अन+ज्+ति (VI. 4. 23. S. 2544)=अनक्ति । The dual is अन+ज्+तः=अन्+०+ज्+तः (S. 2469) =अक्तः (VIII. 2. 30. S. 378, VIII. 4. 55. S. 121). The Plural is अञ्जन्ति । The Perfect 3. S. is आनञ्ज; the 2. D. is आनञ्जिथ or आनक्थ ।

In forming the Aorist there is the augment इट् by the following sûtra:

२५४६ । अञ्जेः सिचि । ७ । २ । ७१ ।

अञ्जेः सिचो नित्यमिट् स्यात् । आञ्जीत् ।

2546. The स् of the s-Aorist always takes the इट् after अञ्ज् (Rudh. 21).

As आञ्जीत्, आञ्जिष्टाम्, आञ्जिषुः ॥ But अक्ता or अञ्जिता in tenses other than Aorist. The root having an indicatory long ऋ optionally takes इट् (VII. 2. 44.)

21. √añjû 1. to anoint 2. to shine, 3. to go

Pre. अनक्ति । अक्तः । अञ्जन्ति । अनक्षि । अनञ्ज्वः । Per. आनञ्ज । आनञ्जतुः । आनञ्जिथ or आनक्थ । आनञ्जिव or आनञ्ज्व । I Fut. अक्ता or अञ्जिता । II Fut. अक्ष्यति or अञ्जिष्यति । Impera. अनक्तु or अक्तात् । अक्ष्णि । अनजानि । Imper. आनक् । आक्ताम् । आनञ्ज । आञ्ज्व । Poten. अञ्ज्यात् । Bene. अज्यात् । Aor. आञ्जीत् । आञ्जिष्टाम् । Cause. अञ्जयति । Aor आञ्जिजत् । Desid. अञ्जिजिषति । Pass. अक्तः । Act. अक्तवान् । Ger. अञ्जित्वा or अक्त्वा । Nouns:—आञ्ज्यम् । अक्त्यम् । अक्तः । अञ्जिका । अञ्जनं । अञ्जलिः ।

तञ्चु २२ संकोचने ।

तक्ता-तञ्चिता ।

22. √tañchû, √tañjû to contract, shrink.

Pre. तनक्ति । तक्तः । तञ्चन्ति । तनक्षि । तनक्ष्वः । Pre. ततञ्च । ततञ्चतुः । ततञ्चिथ or ततक्थ । ततञ्चिव । I Fut. तञ्चिता or तक्ता । II Fut. तक्ष्यति or तञ्चिष्यति । Impera. तनक्तु or तक्तात् । तक्ष्णि । तनजानि । Imper. अतनक् । अतक्ताम् । अतञ्चन् । अतनक् । अतनक्ष्व । अतञ्च्व । Poten. तञ्च्यात् । Bene तच्यात् । Aor. अताङ्क्षीत् । Cause. तञ्चयति । Aor. अततञ्चत् । Desid. तितञ्चिषति or तितक्षति । Inten. तातच्यते । yaṅ luk तातक्ति । Pass. तक्तः । Ger. तञ्चित्वा । Nouns:—आतञ्चः । तञ्चन् ।

ओविजी २३ भयचलनयोः ।

विनक्ति । विक्तः । 'विज इट्' (२५३६) इति क्ङिति इट् । विविजिय । विजिता । अविनक् । अविजीत् ।

23. √o vijî 1. to be afraid, 2. to shake.

Compare the Divâdi root also. See No 9.

Pre. विनक्ति । विक्तः । विञ्जन्ति । विनक्षि । विनक्थः । विञ्ज्वः । विञ्ज्मः । Per. विवेज । विविजतुः । विविजुः । विविजिय । विविजिव । I Fut. विजिता । There is no guṇa of the root vowel because of the prohibition of I. 2. 2. S. 2536. II Fut. विजिष्यति । (I. 2. 2. S. 2536). Impera. विनक्तु or विक्तात् । विक्ग्धि । विनजानि । Imper. अविनक् । अविक्ताम् । Poten विञ्ज्यात् । विञ्ज्यातां । Bene. विज्यात् । विज्यास्तां । Aor. अविजीत् । अविजिष्टाम् । Causa. वेजयति । Aor अवीविजत् । Desid विविजिषति । Inten. वेविज्यते । yaṅ luk. वेविजीति or वेवेक्ति । Pass विग्नः । Act. विक्ष्यान् । Ger. विजित्वा । (I. 2. 2. S. 2536, in spite of I. 2. 18 S. 3322.)

वृजी २४ वर्जने ।

वृणक्ति । वर्जिता ।

24 √vṛijî to avoid, shine

Pre. वृणक्ति । वृक्तः । वृञ्जन्ति । Per अवर्ज । ववृजतुः । ववर्जिय । ववृजिव । I Fut. वर्जिता । II Fut. वर्जिष्यति । Impera. वृणक्तु or वृक्तात् । वृक्ताम् । वृग्धि । वृणजानि । Imper. अवृणक् । अवृक्ताम् । अवृणक् । अवृक्त । अवृञ्ज्व । अवृञ्ज्म । Poten. वृञ्ज्यात् । Bene. वृज्यात् । Aor. अवर्जीत् । अवर्जिष्टाम् । Causa. वर्जयति Aor. अवीवृजत् or अववर्जत् । Desid. विवर्जिषति । Inten. वरीवृज्यते yaṅ luk वरिवृजीति or वरीवर्क्ति । Pass. नृक्तः । Ger. वर्जित्वा । (I. 2. 18. S. 3322, causes guṇa) Nouns :—प्रवर्ग्यम् ।

पृची २५ संपर्के ।

पृणक्ति । पपर्च ।

25. √pricht, to bring in contact with, join.

Pre पृणक्ति । पृक्तः । पृञ्चन्ति । Per. पपर्च । पपृचतुः । पपर्चिथ ।

Here end the Rudhâdi Roots.

अथ तिङन्त तनादि प्रकरणम् ॥

CHAPTER VIII.

THE TANADI ROOTS.

अथ सप्त स्वरितेतः ।

These are ten roots in all: of which the first seven are Svaritet, and conjugated in both Padas. The first root is,

तनु १ विस्तारे ।

तनादिकृञ्भ्य उः' (२४६६) । तनोति । तन्वः-तनुतः । तनुते । ततान । तेने । तनु । तनीत्-अतानीत् ।

1. तनु √tanu to stretch. In conjugating the roots of this class, sûtra III. 1. 79. S. 2466, introduces the vikaraṇa उ। For the facility of reference we repeat that sûtra here.

२५४७। क। तनादि कृञ्भ्य उः। ३। १। ७८।

2547. A. The vikaraṇa उ comes after the Tanâdi roots and after the root कृ, in the active voice before sârvadhâtuka affixes.

This debars शप्। Thus तनु+उ+ति=तनु+ति=तनोति। The 1st Person dual is तन्वः or तनुवः। The उ is optionally elided here.

In the Atmanepada we have तनुते। Per. ततान। Pt. तेने। Impve. तनु The ति is elided by VI 4. 106. S. 2334 Imperf. अतनीत् or अतानीत्। In forming the aorist, the सिच् is optionally elided by the following :—

२५४७। तनादिभ्य स्तथासोः। २। ४। ७९।

तनादेः सिचो वा लुक्स्यात्तथासोः। थासा सादृश्यादेकवचनं तग्रन्थो गृह्यते। तेनेह न। ह्यश्वतनिष्ट-अतानिष्ठ। 'अनुदात्तोपदेश-' (२४२८) इत्यनुनासिकलोपः। तकि। अतत-अतनिष्ठ। अतथाः-अतनिष्ठाः।

2547. After the verbs of Tanâdi class there is optionally the luk-elision of सिच्, when the Atmanepada affixes त and थास् of the third and second person singular follow.

The त refers to the 3rd Per. Singular affix, because it is read in the company of थास which is also singular. Hence in the Second Per. Plural of Parasmaipada त there is no elision of सिच्. Thus, अतनिष्ट ह्यश्वस् or अतानिष्ट ह्यश्वस्। The vṛiddhi is by VII. 2. 7. S. 2284. In अतत the nasal is elided by VI. 4. 37. S. 2428. As अतन्+सिच्+त=अतन्+०+त (S. 2547)=अत+०+०+त (S 2428).

Thus अतत। (VI. 4. 37) or अतनिष्ट 'he expanded,' अतथाः or अतनिष्ठाः 'thou didst expand.' Similarly अदात or अदनिष्ट 'he gave.' अदाथाः or अदनिष्ठाः 'thou didst give.'

1, √tanu to stretch, extend.

Pre. तनोति, तनुतः। तन्वन्ति। तनोषि। तनोमि। तन्वः or तनुवः। तन्मः or तनुमः। Per. ततान। तेनतुः। तेनुः। तेनिथ। तेनथुः। तेन। ततान or ततन। तेनिव। तेनिम। I Fut. तनिता। II Fut. तनिष्यति Impera. तनोतु, or तनुतात्। तनुताम्। तन्वन्तु। तनु। तनवानि। Imper. अतनोत्। अतनुताम्। अतन्वन्। अतनोः। अतनतम्। अतन्त or अतनुत। Poten. तनुयात्। तनुयाताम्। तनुयुः। तनुयाः। Bene. तन्यात्। तन्यास्ताम्। Aor. अतनीत्। अतानिष्टाम् or अतनिष्टाम्। Pass. तायते or तन्यते। Causa तानयति। Aor. अतीतनत्। Desid. तितनिषति or तितांसति or तितंसति। The इट् is optional under a Vârtika to VII. 4. 56· S. 2621. The lengthening is by VI. 4. 17. S. 2622. Inten. तंतन्यते yaṅ luk तन्तन्ति। D. तन्ताव्तः। Ger. तंत्वा or तनित्वा। Nouns :—तन्तिः। ततिः। चरीतनु। तनुः। तनूः। तन्त्रम्। तानः। सितनः॥

1. √tanu. Atmanepada.

Pre. तनुते । तन्वाते । तन्वते । तनुषे । तन्वे । तनुवहे or तन्वहे । Per. तेने । तेनाते । तेनिषे । तेनिवहे । I Fut तनिता । II Fut. तनिष्यते । Impera. तनुताम् । तन्वाताम् । तनुष्व । तनवै । Imper. अतनुत । अतन्वाताम् । अतन्वत । अतनुथाः । Poten. तन्वीत । तन्वीयाताम् । तन्वीथाः । तन्वीय । Bene. तनिषीष्ट । तनिषीयास्ताम् । Aor. अतत or अतनिष्ट । अतथाः or अतनिष्ठाः । अतनिष्वम् ।

षणु २ दाने ।

सनोति-सनुते । 'ये विभाषा' (२३९९) । सायात्-सन्यात् । 'अभ्यस्त-' (२५०४) इत्यात्वम् । असात-असनिष्ट । असाथाः-असनिष्ठाः ।

2. √shanu to give, bestow.

In the Potential the स् is optionally replaced by आ under VI. 4. 43. S. 2319. Thus सायात् or सन्यात् । Before jhalâdi affixes there is आ substitution by VI. 4. 42. S. 2504. As असात् or असनिष्ट । असाथाः or असनिष्ठाः । The ष in the root is lâkshaṇika, the real letter is न । We see this न in yaṅ luk as संसन्ति । Pre. सनोति । A. सनुते । Per. ससान । A. सेने । Poten सायात् । Bene. सन्यात् । Aor असानीत् A असनिष्ट or असात । (VI. 4. 42 S. 2504), Pass सायते or सन्यते । Desid. सिषासति or सिसनिषति । Inten. संसन्यते or ससायते yaṅ luk संसन्ति । Pass. सातः । Act. सातवान् । Ger. सात्वा or सनित्वा । Nouns :—सातिः । सतिः । सन्तिः ।

क्षणु ३ हिंसायाम् ।

क्षणोति । क्षणुते । 'क्षयस्त-' (२२९९) इति न वृद्धिः । अक्षणीत्-अक्षत-अक्षणिष्ट । अक्षथाः-अक्षणिष्ठाः ।

3. √kshaṇu to hurt, injure, to kill.

In the aorist there is no Vṛiddhi, because of the prohibition of VII. 2. 5. S. 2299. As अक्षणीत् A. अक्षत or अक्षणिष्ट । अक्षथाः or अक्षणिष्ठाः The ष् of the root is lâkshaṇika, the real letter is न We see it in क्षिणन्ति and क्षन्तिः ।

Pre. क्षणोति A. क्षणुते । Per. चक्षाण A. चक्षणे । I Fut. क्षनिता । A. क्षनिताहे । II Fut. क्षनिष्यति A. क्षनिष्यते । Impera क्षणोतु or क्षणुतात् A. क्षणुताम् । क्षन्वाताम् । Imper. अक्षणोत् । A. अक्षणुत । Poten. क्षणुयात् A. क्षनीत । Bene क्षन्यात् A. क्षनिषीष्ट । Aor. अक्षणीत्; अक्षनिष्ट A. अक्षत A. अक्षनिष्टाम् A. अक्षथाः or अक्षनिष्ठाः । Causa. क्षानयति Aor. अचिक्षनत् । Desid क्षिक्षनिषति । Inten चक्षन्यते । Part. Pass. क्षतः । Ger. क्षत्वा or क्षनित्वा ।

क्षिणु ४ च ।

उपदेशनिमित्तो लघूपधगुणः । 'x संज्ञापूर्वको विधिरनित्यः x' इति न भवतीत्यात्रेयमतम् । भवत्येवेत्यन्ये । क्षिणोति-क्षेणोति । क्षेक्षितास्मि । क्षेक्षितासे । अक्षेक्षीत् । अक्षित-अक्षेक्षिष्ट ।

4. √kshiṇu cha to kill, hurt.

When the vikraṇa श is added there is guṇa of the penultimate short इ । But according to Atreya, there is no guṇa, on the maxim that a rule enunciated by employing a technical term in it is not universally valid.

Pre क्षिणोति or क्षेणोति A. क्षिणुते। Per. चिक्षेण A. चिक्षिणे। I Fut. क्षेणिता। क्षेणितास्मि। A क्षेणितास्मे II Fut. क्षेणिष्यति। A क्षेणिष्यते। Impera. क्षिणोतु A. क्षिणुताम्। Imper. अक्षिणोत् A. अक्षिणुत। Poten. क्षिणुयात् A. क्षिणीत। Bene. क्षीयात् A. क्षिक्षीष्ट। Aor. अक्षेणीत् A अक्षित or अक्षेणिष्ट। अक्षिक्षिष्टाः। Causa. क्षेणयति। Desid. चिक्षिणिषति। Int n. चेक्षीयते yañ luk चेक्षेणूति। Pass. क्षितः। Ger. क्षित्वा or क्षेणित्वा or क्षित्वा। Nouns:—क्षितिः।

ऋणु ५ गतौ।

ऋणोति-अर्णोतिः अर्णुतः। अर्णुवन्ति। आनर्ण। आनृणे। अर्णितास्मि। आर्णीत्। आर्त-आर्णिष्ट। आर्णाः-आर्णिषुः।

5. √ṛiṇu to go.

Pre. अर्णोति। अर्णुतः। अर्णवन्ति। अर्णोषि। अर्णोमि। Per. आनर्ण। आनृणतुः। आनर्णिथ। आनृण। आनृणिव। I Fut. अर्णिता। अर्णितास्मि। II Fut. अर्णिष्यति। Impera. अर्णोतु। अर्णुहि। Imper. आर्णोत्। आर्णुताम्। Poten. अर्णुयात्। Bene. ऋण्यात्। Aor. आर्णीत्। आर्णिष्टाम्। आर्त or आर्णिष्ट। Causa आर्णयति Aor. आर्णयत् or अ+अर्णिनत् or अ+अर्णिनत्। Desid. अर्णिनिषति। Pass. ऋतः। Act. ऋतवान्। Ger. ऋत्वा or अर्णित्वा। Nouns:— अर्णः। अर्णवः। ऋतिः। स्वर्णः।

5. √ṛiṇu Atmanepada.

Pre. अर्णुते। अर्णवाते। अर्णवते। अनर्ण। Per. आनृणे। आनृणिवे। आनृणिवहे। I Fut. अर्णिता। II Fut. अर्णिष्यते। Bene. अर्णिषीष्ट। Aor. आर्णिष्टाः or आर्णाः।

तृणु ६ अदने।

तृणोति-तर्णोति। तृणुते-तर्णुते।

6. √tṛiṇu to eat grass or graze.

Pre. तर्णोति or तृणोति A. तर्णुते or तृणुते। Per. ततर्ण। Nouns:—तृणद्। अतृणद्

घृणु ७ दीप्तौ।

अघर्ण। अघृणे।

7. √ghṛiṇu, to shine, burn.

Pre. घर्णोति। A. घर्णुते। Per अघर्ण A अघृणे। Noun :— घृणा।

अथ द्वावनुदात्तेतौ।

Now the next two roots are anu lâttet.

वनु ८ याचने।

वनुते। ववने। वाव्रनते परस्मैपदी। वनोति। ववान।

8. √vanu to beg, ask, request. Thus Pre. वनुते। Per. ववने। In the opinion of Chandra, the root is Parasmaipadî As वनोति। Per ववान।

Pre. वनुते। वनुवे। वन्वे। वनुवहे। Per. ववने। ववनिवे। I Fut. वनिता। II Fut. वनिष्यते। Impera. वनुताम्। Imper. अवनुत। Poten. वन्वीत। Bene. वनिषीष्ट। Aor. अवनिष्ट or अवत। अवनिषाः or अवथाः। Causa. वानयति। Desid. विवनिषते। Inten. वंवन्यते। yañ luk. वंवनिते। Past Part. Pass. वतः। Act. वतवान्। Ger. वनित्वा or वत्वा। Nouns :—वनिः। वनी। वाञ्छा। वनीवकः। वनीयः।

मनु ९ अवबोधने।

मनुते। मेने।

9. √manu to consider.

Pre. मनुते। Per. मेने।

डुकृञ् १० करणे ।

करोति । 'अत उत्सार्वधातुके' (२४६७) । कुरुतः । यस् । स नकुर्करात्' (१६२९) इति न दीर्घः । कुर्वन्ति ।

10. √du kṛiñ, to do.

The Present 3rd Per. Sing. is करोति । The dual is कृ+उ+तः=कर्+उ+तः=कुर्+उ+तः । (the अ is changed to उ by VI 4. 110 S. 2467)=कुरुतः । The plural is कुर+अन्ति=कुर्वन्ति । The उ is changed to व. The lengthening required by VIII. 2. 78. S. 2265, does not take place because of the prohibition of VIII. 2. 79 S. 1629.

In the First Person Dual and Plural, the affix उ is elided by the following :—

२५४८ । नित्यं करोतेः । ६ । ४ । १०८ ।

करोतेः । प्रत्ययोकारस्य नित्यं लोपः स्याद्वसवोः परयोः । कुर्वः । कुर्मः । चकर्थ । चकृव । कर्ता । करिष्यति ।

2548. The elision of उ is invariable before व् and म् in the case of कृ (करोति).

Thus कुर्वः and कुर्मः ॥ Thus कृ+उ+वः=कुर्+उ+वः (VI. 4. 110. S. 2467)=कुर्+०+वः (VI. 4. 108). Now the lopa being not sthânivat, when a vowel is to be lengthened (I. 1. 58 S. 51.) उ of कु should be lengthened by VIII 2. 77. S. 354. This contingency is prevented by VIII 2. 79. S. 1629.

In the Potential we have the same elision by the following :—

२५४९ । ये च । ६ । ४ । १०९ ।

कृञ उलोपः स्यादादौ प्रत्यये परे । कुर्यात् । आशिषि क्रियात् । कृषीष्ट । अकार्षीत् । 'सनाशिष्यः–' (२५४७) इति लुकोऽभावे स्यादकृत्' (२३६९) इति सिचो लोपः । अकृत । अकृषाः ।

2549. The affix उ of the stem कृ is always elided before a personal ending beginning with a य ॥

Thus कुर्यात् कुर्यातां and कुर्युः ॥ The augment यासुट् is treated here as an affix, and it makes the personal ending to which it is added, as an affix beginning with य ॥

The Parasmaipada aorist is अकार्षीत् । In the Atmanepada, the सिच् will be *optionally* elided by II. 4. 79 S. 2547. In the other alternative the सिच् will be elided by VIII. 2. 27. S. 2369. In other words, there will be no सिच् at all. As अकृत and अकृषाः ।

10. √du kriñ to do.

Pre. करोति । कुरुतः । कुर्वन्ति । करोषि । कुरुथः । कुरुथ । करोमि । कुर्वः । कुर्मः । Per. चकार । चक्रतुः । चक्रुः । चकर्थ । चकृव । I Fut. कर्ता । II Fut. करिष्यति । Impera. करोतु, कुरुताद् । कुरुताद् । कुरु । करवाणि । Imper. अकरोत् । अकरोः । अकरवम् । Poten. कुर्यात् । कुर्यावाम् । कुर्याः । Bene. क्रियात् । क्रियास्ताम् । Aor. अकार्षीत् । अकार्ष्टाम् ।

Pass. क्रियते Aor. अकारि। Causa कारयति Aor अचीकरत्। Desid. चिकीर्षति। Inten. कर्करीयते yañ luk चर्कर्ति or चर्करीति। Pass कृतः। Act कृतवान्। Nouns:—कृती। कृत्रिमम्। कर्म। कर्मटः। कारः। क्रतुः। कार्षापणः।। कृकः

10. √du kṛiñ. Atmanepada.

Pre. कुरुते। कुर्वाते। कुर्वते। कुरुषे। कुर्वे। कुर्वहे। Per. चक्रे। चक्राते। चकृपे। चकृवहे। Impera. कुरुताम्। कुरुष्व। करवै। Imper. अकुरुत। अकुरुथाः। Poten. कुर्वीत। कुर्वीयाताम्। कुर्वीथ। Bene कृषीष्ट। कृषीयास्ताम्। Aor. अकृत। अकृषाताम्।

When the root कृ is preceded by the upasarga सम् &c, a sibilant is inserted by the following two sûtras.

२५५०। संपरिभ्यां करोतौ भूषणे। ६। १। १३७।

2550. The augment सुट् is placed before क when सम्, परि and उप are followed by the verb कृ and the sense is that of ornamenting.

२५५१। समवाये च। ६। १। १३८।

संपरिपूर्वस्य करोतेः सुट् स्वाद्भूषणे संघाते चार्थे। संस्करोति। अलं करोतीत्यर्थः। संस्कुर्वन्ति। संघीभवन्तीत्यर्थः। संपूर्वस्य क्वचिदभूषणेऽपि सुट्। 'संस्कृतं भक्षाः' (१२१७) इति ज्ञापकात्। 'परिनिविभ्यः–' (२२७५) इति षः। परिष्करोति। विभाषादीनां वा। पर्यस्कार्षीत्–पर्यस्कार्षीत्।

2551 The augment सुट् is placed before क, when the verb कृ comes after सम्, परि and उप, the sense being that of combining.

Thus संस्करोति। The meaning is अलंकरोति 'he adorns.' So also संस्कुर्वन्ति meaning 'they combine.'

The augment सुट् is sometimes added to the root preceded by स even when the meaning is not that of adorning. Because Paṇini himself has used the word संस्कृतं in the sûtra संस्कृत भक्षाः (S. 1217) not in the sense of adorning.

With परि, the स of सुट् is changed to ष by VIII. 3. 70. S. 2275. As परिष्करोति। It is optional under the conditions of S. 2359. As पर्यस्कार्षीत् or पर्यस्कार्षीत्।

Thus संस्कर्ता, संस्कर्तुम्, संस्कर्तव्यम्॥ The म् of सम् is changed to anusvâra by VIII. 3. 5. So also परिष्कर्ता परिष्कर्तुं परिष्कर्तव्यम्॥ The स is changed to ष by VIII, 3. 70. So also with उप, as उपस्कर्ता, उपस्कर्तुम् उपस्कर्तव्यम्॥ Why do we say 'when meaning to ornament'? Observe उपकरोति॥ Sometime सुट् comes after सम् even when the sense is not that of ornamenting; thus संस्कृतमश्नन्॥

The word समवाय means aggregation. Thus तत्र नः संस्कृतम् त नः परिष्कृतम्, तत्र नः उपस्कृतम्=समुदितम् that is 'we assembled there.'

With उप the root, takes सुट् and has then the following additional meanings also, in addition to that given above.

२५५२ । उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च । ६ । १ । १३९ ।

उपात्कृञः सुट् स्यादेत्यर्थेषु । चात्प्राग्गुणयोरर्थयोः । प्रतियत्नो गुणाधानम् । विकृतमेव वैकृतं विकारः । स्वार्थेऽण् । आकाङ्क्षितैकदेशपूरणम् । उपस्कृता कन्या । अलंकृतेत्यर्थः । उपस्कृता ब्राह्मणाः । सङ्गतिता इत्यर्थः । यथोदकस्योपस्कुरुते । गुणाधानं करोतीत्यर्थः । उपस्कृतं भुङ्क्ते । विकृत मित्यर्थः । उपस्कृतं ब्रूते । वाक्याध्याहारेण ब्रूत इत्यर्थः ।

2552. The augment सुट् is placed before कृ, when the verb comes after उप, and the sense is that of 'to take pains for something, to prepare, and to supply an ellipses in a discourse'.

To take pains in imparting a new quality to a thing in order to increase its value, or to keep it safe rom deterioration is called प्रतियत्नः ॥ That which is prepared or altered is called वैकृतं ॥ The word वैकृतं is the same as विकृतं, the affix अण् being added without changing the sense, by considering it to belong to प्रज्ञादि class (V. 4. 38). To supply by distinct statement the sense of a sentence which is alluded to, is called the अध्याहार of a sentence. Thus उपस्कृता कन्या, 'an adorned girl'. उपस्कृता ब्राह्मणाः 'the assembled Brâhmaṇas,' are examples under S. 2550 and 2551. While in the sense of 'taking pains' we have यथोदकस्योपस्कुरुते (See I. 3. 32); चाक्षुषस्योपस्कुरुते ॥ In the sense of 'altering by preparing' we have : उपस्कृतं भुङ्क्ते, उपस्कृतं गच्छति ॥ In the sense of 'supplying a thesis' we have उपस्कृतं ब्रूते, उपस्कृतंपचीते ॥ When not having any one of the above five senses (VI. 1. 137-139) we have उपस्करोति ॥

By the following sûtra, the augment is always to be placed before the कृ of कृ ।

२५५३ । सुट्कात्पूर्वः । ६ । १ । १३५ ।

'* अहम्भावव्यवायेऽपि *' इत्युक्तम् । संचस्कार । 'कात्पूर्व–' इत्यादि भाष्ये प्रत्याख्यातम् । तथा हि 'पूर्वं धातुप्रवचनेन भूयते' । अन्तरङ्गत्वात्सुट् । ततो द्वित्वम् । एवं च 'श्रुतश्च संयोगादेर्गुरुः' (२३८९) । संचस्करतुः । 'कृसृभृ–' (२२९३) सूत्रे 'श्रुतेः शारद्वाजस्य' (२२९४) इति सूत्रे च '* कृञोऽसुट इति वक्तव्यम् *' । तेन सुट्कात्परस्येट् । संचस्करिथ । संचस्करिव । 'गुरोऽर्ति–' (२३८०) इति सूत्रे 'नित्यं छन्दसि' (३५८७) इति सूत्रात् 'नित्यम्' इत्यनुवर्तते । 'नित्यं यः संयोगादिस्तस्य' इत्यर्थात्सुटि गुरोः न । संस्मियात् । 'श्रुतश्च संयोगादेः' (२५२६) इति सिचि विभाषेण्ट् । 'एकाच उपदेशे–' (२२४६) इति सूत्रात् 'उपदेशे इत्यनुवर्त्य 'उपदेशे यः संयोगादिः' इति व्याख्यानात् । संस्कृषीष्ट । उपस्कृत । उपस्कृषातात् ।

2553. Upto VI. 1. 157 inclusive, the following sentence is to be supplied in every aphorism:—" before कृ is added सुट् " ॥

Vart:—The augment is to be added to कृ even when the augment अट् or the reduplicate intervenes between the Preposition and the कृ । We have taught this vârtika already under VI. 1. 140. S. 2539. Thus संचस्कार in the Perfect. Here the स is added between the abhyasa च and कृ ।

In the Mahâbhâshya the addition of the phrase कात्पूर्वः in the sûtra has been criticised as redundant. That being so, we add the preposition first to the root, on the maxim that an upasarga is first joined to the

root. Then we add सुट् as it is antaranga to the rule of reduplication. Then we reduplicate. Thus we have सस्कृ। Now we apply VII. 4. 10. S. 2379, and guṇa is substituted for कृ in the ङित् affixes of the Perfect. As संचस्करतुः।

The sûtras S. 2293 and 2296 which prohibit इट् augment with regard to कृ, should be read as qualified by the following:—

Vârtika:—The sûtras 2293 and 2296 apply to the कृ which has not taken the augment सुट्। Therefore when सुट् is added, the root takes the augment इट्। As संचस्करिव। संचस्करिम।

In the ङित्, the root स्कृ ought to take guṇa, by VII. 4. 29. S. 2380, because it ends in and begins with a conjunct consonant. This guṇa, however, does not take place, because in S. 2380 we read the anuvṛitti of ङिच्च from the preceding Ashtâdhyayi sûtra VII. 4. 8. S. 3587, and we interpret the word saṅyogâdi there to mean such a root which *always* begins with a conjunct consonant. But स्कृ is not such a root. The √कृ has temporarily assumed this form. Thus we have संस्कृवान्।

Nor is इट् augment added in the Benedictive, and the Aorist by VII. 2. 43. S. 2526: for स्कृ is not the saṅyogâdi root contemplated by that sûtra. For in that sûtra we read the anuvṛitti of उपदेशे from the preceding Ashtâdhyâyî sûtra VII. 2. 10. S. 2246; and we interpret that sûtra to mean 'a root which in its *first enunciation* (upadeśa) in the Dhâtupâṭha is saṅyogâdi and ends with ऋ takes इट् in the Benedictive and Aorist in the Atmanepada.' Now स्कृ is not sanyogâdi in the updeśa: there it is only कृ। So that sûtra does not apply, and we have no इट्। The Benedictive therefore is संस्कृषीष्ट and the Aorist is असस्कृत, dual असस्कृषाताम्।

The view of Kâsikâ is given in the following note:—

Note:—What is the necessity of using the phrase आदृगमहनजनः in this sûtra? It is used to indicate that the सुट् remains unattached to कृ, though it stands before it. Thus though कृ becomes स्कृ, yet the latter should not be considered to be a verb beginning with a conjunct (sanyoga) consonant: and therefore the guṇa taught in VII. 4. 10 S. 2379 (the root ending in ऋ and preceded by a conjunct letter, takes guṇa before ङित्) does not apply, nor do the rules like VII. 4. 29. S. 2380, nor the rules ordaining the addition of intermediate इट् (VII. 2. 43 S. 2526) by which the इट् would come in ङित् and ङिच् (Benedictive and Aorist): as, संस्कृषीष्ट and असस्कृत; and so also VII. 4. 29 S. 2380 does not apply as संस्करिष्यते the Benedictive (यस्मिं ङिति) of संस्कृ॥ If so, then the anudâtta accent taught in VIII. 1. 28 would not take place, since the augment सुट् would intervene between the non-ङित्-word सं and the ङिदन्त word करोति, thus संस्करोति would have accent on the verb. It is a maxim स्वरविधौ व्यञ्जनमविद्यमानवत् 'in applying a rule

relating to accent the intervening consonants are considered as if non-existent'; and therefore उदुद् does not offer any intervention to the application of the rule VIII. 1. 28. S. 3935. If द् is not to be taken as attached to क, how do you explain the guṇa, in the Perfect 3rd Per. Dual and Plural in संचस्करतुः and संचस्करुः which apparently is done by applying VII. 4. 10. S. 2379. Though that rule strictly applies to roots beginning with a conjunct consonant, it will apply also to roots like संस्कृ which have a conjunct consonant for their penultimate; and the guṇa is done also on the maxim तन्मध्यपतितस्तद् ग्रहणेन गृह्यते (See VI. 1. 132). The indicatory द् in उदुद् is for the purpose of differentiating it from उ in the Sûtra VIII. 3. 70.

इति तिङन्ततनादिप्रकरणम् ।

अथ तिङन्त क्र्यादि प्रकरणम् ॥

CHAPTER IX.

THE KRYADI ROOTS.

डुक्रीञ् १ द्रव्यविनिमये ।

1. √ḍu krîñ. To purchase, to barter.

The kryâdi roots form the ninth class. They contain 61 roots. In conjugating these roots श्ना is added as a vikâraṇa by the following sûtra.

२५५४ । क्र्यादिभ्यः श्ना । ३ । १ । ८१ ।

क्रीणाति । 'ङै इण्यणोः' (२४८७) । क्रीणीतः । ङैत्त्वात्पूर्वं भेरन्तादेशः परत्वान्नित्यत्वादन्तरङ्गत्वाच्च । एवं झल्यादावपि । ततः 'श्नाभ्यस्तयोः–' (२४८३) इत्यालोपः । क्रीणन्ति । क्रीणीते । क्रीणाते । क्रीणते । चिक्राय । चिक्रियतुः । चिक्रेयिथ–चिक्रयिथ । चिक्रियिव । चिक्रियिमे क्रेता । क्रेष्यति । क्रीयात् । क्रेषीष्ट । अक्रैषीत् । अक्रेष्ट ।

2554. The affix श्ना comes after the roots of the Kryâdi class when a sârvadhâtuka affix follows denoting the agent.

Thus क्री+श्ना+तिप्=क्रीणाति 'He buys.' The dual is क्री+ना+तस् =क्री+नी+तस् (VI. 4. 113. S. 2497, the आ is replaced by ङै)=क्रीणीतः । The plural is क्री+ना+झि. Here झ्नि should replace झ prior to the operation of the ङै—rule: because it is a subsequent rule, being VIII. 1. 3. S. 2169; because it is a *nitya* or universal rule, and lastly because it is antaraṅga. So is the case when झ is replaced by झत् (by VII. 1. 5. S. 2258). After such झ्नि substitution, we have क्री+ना+झ्नि । Now applies VI. 4. 112 S. 2483 and आ is elided. Thus we yet क्रीणन्ति ।

1. √ḍu krîñ, to buy, purchase.

Parasmai. Pre. क्रीणाति। क्रीणीतः। क्रीणन्ति। क्रीणासि। क्रीणीथः क्रीणीथ। क्रीणामि। क्रीणीवः। क्रीणीमः। Per. चिक्राय। चिक्रियतुः। चिक्रियुः। चिक्रयिथ or चिक्रेथ। चिक्रियथुः। चिक्रिय। चिक्राय or चिक्राय। चिक्रियिव। चिक्रियिम। I Fut क्रेता। II Fut. क्रेष्यति। Impera. क्रीणीतात् or क्रीणातु। क्रीणीताम्। क्रीणन्तु। क्रीणीहि। क्रीणीतम्। क्रीणीत। क्रीणानि। क्रीणाव। क्रीणाम। Imper. अक्रीणात्। अक्रीणीताम्। अक्रीणन्। अक्रीणाः। अक्रीणीतम्। अक्रीणीत। अक्रीणाम्। अक्रीणीव। अक्रीणीम। Poten. क्रीणीयात्। क्रीणीयाताम्। क्रीणीयुः। क्रीणीयाः। क्रीणीयाम्। क्रीणीयाव। Bene. क्रीयात्। क्रीयास्ताम्। Aor. अक्रैषीत्। अक्रेष्टाम्। अक्रैषुः। अक्रैषीः। अक्रैष्टम्। अक्रैष्ट। अक्रैष्वम्। अक्रैष्व। अक्रैष्म। Causa. क्रापयति। Aor. अचिक्रपत्। Desid चिक्रीषति। Inten. चेक्रीयते। yaṅ luk चेक्रेति। Past Part. Pass. क्रीतः। Act. क्रीतवान्। Nouns:—क्रीत्रिमं। क्रयः। क्रेयः। क्रायकः।

Atmane. Pre. क्रीणीते। क्रीणाते। क्रीणते। क्रीणीषे। क्रीणाथे। क्रीणीध्वे। क्रीणे। क्रीणीवहे। क्रीणीमहे। Per. चिक्रिये। चिक्रियाते। चिक्रियिरे। चिक्रियिषे। चिक्रियाथे। चिक्रियिध्वे। चिक्रिये। चिक्रियिवहे। चिक्रियिमहे। I Fut. क्रेता। II Fut. क्रेष्यते। Impera. क्रीणीताम्। क्रीणाताम्। क्रीणताम्। क्रीणीष्व। क्रीणाथाम्। क्रीणीध्वम्॥ क्रीणै। क्रीणावहै। क्रीणामहै। Imper अक्रीणीत। अक्रीणाताम्। अक्रीणत। अक्रीणीथाः। अक्रीणाथाम्। अक्रीणीध्वम्। अक्रीणि। अक्रीणीवहि। अक्रीणीमहि। Poten. क्रीणीत। क्रीणीयाताम्। क्रीणीयाः। क्रीणीय। क्रीणीवहि। क्रीणीमहि। Bene. क्रेषीष्ट। क्रेषीयास्ताम्। Aor. अक्रेष्ट। अक्रेषाताम्। अक्रेषत। अक्रेष्ठाः। अक्रेषाथाम्। अक्रेढ्वम्। अक्रेषि। अक्रेष्वहि। अक्रेष्महि। Desid. चिक्रीषते।

प्रीञ् २ तर्पणे कान्तौ च।

कान्तिः कामना। प्रीणाति-प्रीणीते।

2. √prîñ 1. to please, 2. to be cheerful or gay. Kânti means desire. It is conjugated like √kṛi.

Pre. प्रीणाति A. प्रीणीते। Causa. प्रीणयति। Aor. अचिप्रीणत्। Adjec. प्रियः। Noun:—प्रियः।

श्रीञ् ३ पाके।

3. √śriñ to cook.

Pre. श्रीणाति। A. श्रीणीते। Causa. श्रापयति। Aor. अशिश्रपत्।

मीञ् ४ हिंसायाम्।

'हिञ् मीना' (२५३०)। प्रमीणाति। प्रमीणीतः। 'मीनातिनिमीति–' (२५०८) इत्येत्त्वम् आत्वम्। ममौ। मिम्यतुः। ममिथ-ममाथ। मिम्ये। माता। मास्यति। मीयात्। मासीष्ट। अमासीत्। अमासिष्टाम्। अमास्त।

4. √miñ to kill, injure. After an alterant preposition the म is changed to ण by VIII. 4. 15 S. 2530. As प्रमीणाति। प्रमीणीतः. In the Perfect, मी becomes मा by VI. 1. 50. S. 2508, where otherwise it would have become either मे or मै by guṇa or vṛiddhi.

Parasmai. Pre. मीणाति। मीणीतः। मीणन्ति। मीणासि। मीणीथः। मीणीथ। Per. ममौ। मिम्यतुः। ममिथ or ममाथ। मिम्यथुः। मिम्य। ममौ। मिम्यिव। I Fut. माता। II Fut. मास्यति। Impera.

मीनातु। Imper. अमीनात्। Poten. मीनीयात्। Bene. मीयात्। Aor. अमासीत्। अमासिष्टाम्। Causa. मापयति। Aor. अमीमपत्। Desid. मित्सति। Inten. मेमीयते yaṅ luk मेमेति। Past Parti. Pass. मीतः। Act. मीतवान्। Ger. मीत्वा। Nouns:—मयः। मयः।

Atmane Pre. मीनीते। मीनाते। मीनीषे। मीने। मीनीवहे। Pre. मिन्ये। मिन्विवहे। मिन्ये। मिन्विवहे। I Fut. माता। II Fut. मास्यते। Impera. मीनीतात्। Imper. अमीनीत। Poten. मीनीत। Bene. मासीष्ट। Aor. अमास्त। अमासाताम्। Desid. मित्सते।

षिञ् ५ बन्धने।

